# Shri Ganapati Stotram

# શ્રીગણપતિસ્તોત્રમ્ ૭

## Document Information

Text title : Shri Ganapati Stotram 06 10

File name : gaNapatistotram7.itx

Category : ganesha, stotra

Location : doc_ganesha

Proofread by : Saritha Sangameswaran

Description/comments : prakIrNastotrANi Stotrarnavah Ed. T.Chandrasekharan 1961 From stotrArNavaH 06-10

Latest update : March 27, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2022

*sanskritdocuments.org*

# શ્રીગણપતિસ્તોત્રમ્ ૭

આસ્તે ઘોરસમુદ્રવાસવદિશાપારસ્થલીગોપુરાત્
બાહ્યે વામકરર્થકાશવિષયે માદ્યં મહાન્ પિપ્પલઃ ।
આસ્થાનં યદુપાન્તધન્યધરણીમાસ્થાય દેવઃ સ્વયં
દન્તીન્દ્રાનનવિગ્રહસ્ત્રિભુવનં પુષ્ણાતિ તૈસ્તૈર્વ રૈઃ ॥ ૧॥

પુરપ્રસરદદ્ભુતં પ્રથિતદાનતિભ્યત્કરં
વિભોરભિનવાત્મજં વટતરુસ્થલાવાસિતમ્ ।
મુહુઃ ફલિતપિપ્પલદ્રુમતટીનિરૂઢાસ્પદં-
મહાગજમદાનનં મણિનિધાનમારાધયે ॥ ૨॥

પરિમલપરિણમ્રૈઃ કમ્રનાનાપ્રસૂનૈ-
રવિરતમભિરામૈરાત્તભૂષાવિશેષમ્ ।
અપિ ચ નિચિતલીલાકલ્પશિલ્પોપચારૈ-
રુપચિતમભિવન્દે દૈવતં દન્તિવક્ત્રમ્ ॥ ૩॥

ચલદલતટભૂમિભૂષણં
મદકલકુઞ્જરમઞ્જુલાનનમ્ ।
ભજત ભજત વૃષ્ટિભિ —-
ર્હરિતહરેણ કરેણ ભૂષિતમ્ ॥ ૪॥

આલોકય મહાશ્ચર્યં મૂલે પિપ્પલશાખિનઃ ।
લીલાકલ્પતરુઃ કોऽપિ ખેલામુખગજાયતે ॥ ૫॥

નિષ્પતન્નિબિડામૃતદિવમુદિતેષુ કલાઙ્કિતમ્ (નિષ્પતન્નિબિડામૃતદ્રવપૂરિતેન્દુ)
શિલ્પભારધુરાધુરન્ધરચિત્રભૂષણભૂષિતં
કલ્પમાનકૃપાકટાક્ષનિરીક્ષિતાખિલવૈભવં
પિપ્પલદ્રુમવિદ્રુમસ્થલકલ્પકદ્રુમમાદ્રિયે ॥ ૬॥

વન્દે બહુલમાધુર્યકન્દલીલલિતાદ્ભુતમ્ ।

મન્દેતરમહૈશ્વર્યમન્દિરં સિન્ધુરાનનમ્ ॥ ૭॥

મદજલવિલુલિતકટતટવિલુઠિત-
    મધુકરપરિકરમુખરિતપરિમલમ્ ।
અભિમતવરભરવિતરણપરિણત-
    મદકલકરતલગજમુખ જય જય ॥ ૮॥

મન્દેતરૈશ્વર્યમહાભિષેક-
    સન્દોહધાર —। -। -પપ્રવાહમ્ ।
ભિન્દાનમન્તત્તિમિરં દશાનનં
    વન્દામહે મત્તગજેન્દ્રવક્ત્રમ્ ॥ ૯॥

વિતરતુ વિજયોત્સવે —–
    વિજયમહાનિધિરોજસાં નિધિઃ ।
અભિનવમદગન્ધિસિન્ધુરાનનં
    નમ્રવિપદ્ધ્નં મહત્ —- ॥ ૧૦॥

–। -। -સુધારાનદામ્બુભારૈઃ
    કરમ્બિતં વઃ ક —રમ્પિરાબન્ ।
અભીષ્ટવૃષ્ટિં —-ષ્ટગાઢં
    નિધિર્ગુણાનાં ચ પતિર્ગણાનામ્ ॥ ૧૧॥

નિરવધિમદધારાનિર્ઝરોભ્રામ્યમાણ-
    ભ્રમરસમરલીલાધોરણીદત્તદૃષ્ટિઃ ।
અભિમતવરદાનવ્યગ્રહસ્તારાવિન્દો
    કરિકલભમુખી નઃ કામધેનું ધિનોતિ ॥ ૧૨॥

કલ્પિતાનલ્પભૂષેણ વેષેણ બહુલશ્રિયમ્ ।
કલ્પશાખિનમાલમ્બે કરીન્દ્રકલભાનનમ્ ॥ ૧૩॥

કારણં કિમપિ જન્મભાગિનાં
    પૂરણં પુલકિતાદ્ભુતશ્રિયામ્ ।
પારણં ભુવનસર્વસમ્પદાં
    વારણેન્દ્રવદનં ભજેમહ ॥ ૧૪॥ (ભજે મહઃ)

મદોત્કટકટાઙ્ગણભ્રમિતમત્ત ભૃઙ્ગાઙ્ગના-
    કલધ્વનિતધોરણીકલકલોત્સવાસ્વાદિને ।

નમસ્ત્રિદશમણ્ડલીમુકુટકોટિકોટીતટ-
    સ્ખલચ્ચરણપલ્લવલ્લમસહાયધામ્ને નમઃ ॥ ૧૫॥

મદપરિમલક્રીડાક્રોડીકૃતભ્રમરચ્ચટા
    નિબિડનિબિડશ્રીમચ્છુણ્ડાતરઙ્ગિતતાણ્ડવમ્ ।
ત્રિદશપરિષત્સેવાદિવ્યાઞ્જલિક્રમરઞ્જિતં
    દ્વિરદવદનં વેષં વન્દામહે ભુવનશ્રિયઃ ॥ ૧૬॥

વિપલ્લવાન્ ચઃ પદપલ્લવેન
    વિધૂનુતાદાનતકલ્પશાખી ।
શિખામણિઃ શિલ્પિતસિન્ધુરશ્રીઃ
    શ્વશ્રેયસાનાં ચ ગણશ્રિયાં ચ ॥ ૧૭॥

મદદુર્દિનનિર્દયાદરવ્યસનારૂઢમધુવ્રજપ્રજામ્ । (વ્રતપ્રજામ્)
શિવયોરયિ લોચનાદૃતાં શિશિરાં પશ્યત વિશ્વતઃ શ્રિયમ્ ॥ ૧૮॥

દૃઢમલ્લિદલકુડ્મલાગ્રમાલાભિરાલિઙ્ગિનનીલગાત્રમ્ ।
વિરાજતે ધામ ગજેન્દ્રવક્ત્રં નક્ષત્રમાલાભિરિવાન્તરિક્ષમ્ ॥ ૧૯॥

મઙ્ગલ્યદો હિ મદસિન્ધુમહાપ્રવાહમઙ્ગીનિરર્ગલપરિષ્કૃતપુષ્કરાગ્રમ્ ।
તુઙ્ગાનુભાવમનુભાવશતાનુવિદ્ધશૃઙ્ગારભારમવતાચ્છિચવૈભવં વઃ ॥ ૨૦॥

આલોકયાલોકય લોચનાભ્યામાભ્યામુભાભ્યામભિરામસીમમ્ ।
ધામાઙ્કુરં કુઞ્જરરાજવીથિસમુલ્લસદ્વક્ત્રવિચિત્રભાવમ્ ॥ ૨૧॥

નમો નમ્રજગજ્જન્તુચિન્તામણિનખાઙ્ઘ્રયે ।
મત્તહસ્તીન્દ્રવક્ત્રાય ચિત્રાય મહસે મુહુઃ ॥ ૨૨॥

અવિસરદ્ભ્રમરીનિકરોદ્ભટં કટતટે કમનીયમદોત્કટે ।
ગજમુખં ગહનં ભુવનશ્રિયામભિમતં ભવતામભિવર્ષતુ ॥ ૨૩॥

સર્વતઃ કુસુમસમ્પ્લવધારાનિર્વૃતેન મહસા નિરવદ્યમ્ ।
ગર્વહારિ મહસાં ગજવક્ત્રં સ્વર્વધૂસતતગીતમુપાસે ॥ ૨૪॥

અવિરલમદધારં ક્રીડાકડારમધુવ્રત-
    વ્રજવિલુલિતવ્યક્તામોદપ્રમોદિતદિઙ્મુખમ્ ।
હરિપુરવધૂહસ્તોદ્વાન્તપ્રસૂનપરમ્પરા-
    પરિમલદિશે દત્તવ્રીડં ભજામિ ગજાનનમ્ ॥ ૨૫॥

સર્વગર્જિતમદદ્વિપચ્છટાનિર્વિવાદગજરાજસમ્પદે ।
નિર્વૃતિપ્રિયતમાય તેજસે સર્વલોકસુહૃદે નમો નમઃ ॥ ૨૬॥

નમસ્ત્રિલોકીતિલકાઙ્કુરાય કરાગ્રવિન્યસ્તસમસ્તલક્ષ્મૈ ।
કરીન્દ્રવક્ત્રાય સુરેન્દ્રમૌલિમાલાવલીઢપ્રપદાય ધામ્ને ॥ ૨૭॥

સિન્ધુરબન્ધુરવદનં સીમશ્યામાભિરામશિશિરરુચામ્ ।
બન્ધુરબન્ધુજનાનાં બહુમુખમભિમુખમહો મહો જયતિ ॥ ૨૮॥

દિનકરકરપરિરમ્ભાવિજૃમ્ભાવિલસિતં શિલ્પવિકલ્પમ્ ।
સમદૃશિ દૃશિ સુતરામભિરામં મદગજમુખમધિદૈવમુદીયામ્ ॥ ૨૯॥

ત્વામેકમવલમ્બ્યૈવ સ્વારાજ્યં ગમિતા વયમ્ ।
મામેકમવલમ્બ્યૈવ કારુણ્યં ગમિતો ભવાન્ ॥ ૩૦॥

અવિકલકૃપાપાઙ્ગક્રીડાતરઙ્ગિતદિઙ્મુખં
    મદાગજમુખાકારં મન્દેતરસ્ફુટદૈભવમ્ ।
ભવતુ નિભૃતાશેષશ્રેયશ્શ્રયાં નિયતાસ્પદં
    ત્રિભુવનદૃશાં દૃપ્તં ભાગ્યાદ્ભુતં વિજયાય વઃ ॥ ૩૧॥

ભ્રમદ્ભ્રમરમણ્ડલીકલકલારવાડમ્બર-
    સ્ફુરત્પુલકભૂષણં શ્રવણશૂર્પદર્પોદ્ધતમ્ ।
જગજ્જયજયધ્વનિતવૈભવોજ્જૃમ્ભિ ——
    પ્રિયપ્રસરનિર્ભરં ભજ ગજાનનક્રીડિતમ્ ॥ ૩૨॥

આર્દ્રચન્દનરસાનુલિપ્તયોરાવિભાતિ તવ કુમ્ભયોર્દ્વયમ્ ।
ભુક્તિમુક્તિસુધયેવ નિર્ભરં પૂર્ણયોઃ ક્ષરણવેગશઙ્કયા ॥ ૩૩॥

મત્તહસ્તિમુખમસ્તિ વસ્તુ વો વાઞ્છિતાનિ વિતરીતુમુદ્યતમ્ ।
વાઞ્છિતં લલિતકાન્તિસમ્પદાં રાશિના ચ મમ માનસેન ચ ॥ ૩૪॥

કામાત્કિ રતુ વઃ કામં ધામ સામોદ્ભવાનનમ્ । (કામાન્ કિ રતુ)
રામણીયકસર્વસ્વં સર્વસ્વં સર્વસમ્પદામ્ ॥ ૩૫॥

અયમસ્મદીયસુકૃતાઙ્કુરોઽગમો
    હરિદઙ્ગનાઃ શિશિરયન્ દૃશાં શ્રિયા ।
વિજયત્સ્વયં વિજયસિન્ધુરાનનો
    વિજયશ્રિયં દિશતિ વિશ્વતોમુખી ॥ ૩૬॥ (મુખીં)

શેષાભિરશેષાણામૈશ્વર્યવિશેષબહુધારાણામ્ ।
ધુરિ રચિતપટ્ટબન્ધં દૈવં દન્તીન્દ્રમુખમિદં જીયાત્ ॥ ૩૭॥

દેવ ત્વદાલોકનધન્યવૃત્તિ નેત્રદ્વયં ગાત્રમિદં ચ મન્યે ।
કિઞ્ચાન્યદાવેદયતે જનોઽયં કૃતાર્થતાં કેલિકટાક્ષલક્ષ્મ્યા ॥ ૩૮॥

પરિપૂર્ણમનોરથા વયં ભવદાલોકનકેલિસમ્પદા ।
કિમિવાપરમત્ર કીર્ત્યતે કરુણાસાગરગર્ભકિઙ્કરૈઃ ॥ ૩૯॥

અથાપિ કથયામસ્તે વિસ્તરેણ ગિરાં વિના ।
ભગવન્ કરુણાપાઙ્ગૈઃ પાહિ પાહીતિ પાહિ મામ્ ॥ ૪૦॥

ઇતિ શ્રીકૃષ્ણલીલાશુકમુનિવિરચિતં શ્રીગણપતિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Saritha Sangameswaran

---

*Shri Ganapati Stotram*
pdf was typeset on March 27, 2022

Please send corrections to *sanskrit@cheerful.com*